# Omkarasya Darshanikam Svarupam

# ૐકારસ્ય દાર્શનિકં સ્વરૂપમ્

## Document Information

Text title : Onkarasya Darshanikam Svarupam

File name : OMkArasyadArshanikaMsvarUpam.itx

Category : misc, article

Location : doc_z_misc_general

Author : mahAprabhulAla gosvAmI

Proofread by : Meera Iyer

Description/comments : from Sarasvati Sushma 37, Vol. 1-4

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

Omkarasya Darshanikam Svarupam

# ૐકારસ્ય દાર્શનિકં સ્વરૂપમ્

ભારતીયસંસ્કૃતિઃ સમન્વયાત્મિકેતિ દાર્શનિકસિદ્ધાન્તોઽપિ તાત્ત્વિકદૃષ્ટ્યાઽભેદભૂમિમેવાશ્રયતે । ગઙ્ગાપ્રવાહપાત ઇવ વિરોધં મધુમિશ્રણમિવાત્મસાત્કુર્વન્તીયં સંસ્કૃતિઃ અનેકત્વે એકત્વરૂપેણાનુસ્યૂતાક્ષુણ્ણેવાવિરુદ્ધા વિરાજતે ।

નૂનં પ્રત્યક્ષગોચરમિદં વિશાલં બહુધા ભિન્નં બાહ્યં તત્ત્વં તત્રાત્રત્યાચાર્યાણાં નાસ્તિ આક્ષેપઃ, અનેકત્વનિષેધો વા; અપિ તુ બાહ્યસ્તરાવલોકેનેનૈવૈતેષામન્તઃ જ્ઞાનાન્વેષણ એવાતુલનીયઃ પ્રયાસસ્તત્રૈવ પરિતોષઃ, વસ્તુતત્ત્વસ્વરૂપોપલબ્ધિશ્ચાન્યથા શુક્તૌ જાતં રજતજ્ઞાનમપ્યર્થક્રિયાકારિતાં ન જહ્યાત્ । તત્ત્વાનુસન્ધાનતત્પરા ઇમે વસ્તુતત્ત્વાન્તસ્તલે પ્રવેશમવાપ્ય સુધામાધુરીમવગાહ્યાન્યાનપિ સુધાસાગરે ઉન્મજ્જયન્તિ ।

ભારતીયસમન્વયવાદો ન વિરોધભૂમિઃ; અપિ તુ બ્રૈડલેમહોદયાવિષ્કૃતસિદ્ધાન્તે “Appearence and Reality” સત્યાભાસયોરિત્યાખ્યે યથોક્તવન્તઃ તથૈવાત્રાપિ પૂર્વત એવ અવધૂતરહસ્યતત્ત્વં । પરમતત્ત્વે, આપાતદૃષ્ટ્યા, પરસ્પરં વિરુદ્ધાનિ તત્ત્વાનિ નિશ્ચિતૈકાત્મતાયાં વિશૃઙ્ખલતાં નાધત્તે; અપિ તુ સામઞ્જસ્યપૂર્ણેઽસ્મિન્ શરીરે વિરોધં વિહાય અઙ્ગિનોઽક્ષુણ્ણતાં વિધત્તે । સમન્વયાત્મકત્વમેવ ભારતીયદર્શનસ્ય ગતિશીલતાં સમ્પાદયતિ, વિના ગતિં સમન્વયો ન ભવિતુમર્હતિ ।

ભારતીયચિન્તનધારાયાં ધર્મમહત્ત્વં સમ્પ્રદાયપ્રસૂતાન્ધવિશ્વાસો નાસ્તિ । મનોવિજ્ઞાનખનિજોત્પન્નસ્તર્કકર્કશવિચારચાતુરીનિકષ રત્નભૂતોઽયં ધર્મઃ । ધર્મઃ સમ્પૂર્ણસ્ય વિશ્વસ્ય પ્રતિષ્ઠેતિ ધર્મ એવ સર્વં પ્રતિષ્ઠિતમ્, અત એવ શ્રેષ્ઠશ્ચ અપૌરુષેયઃ સનાતન ઉદારશ્ચાયં પુરુષભ્રમપ્રમાદાદિકલઙ્કશૂન્ય આચારશિક્ષાર્થમાર્યૈરઙ્ગીકૃતઃ । અત એવ “આચારઃ પરમો ધર્મઃ” ઇત્યસકૃદુદ્ઘોષો વિદ્યતે શાસ્ત્રેષુ । અનાસક્તિભૂમાવાવસ્થિત એષ ધર્મઃ સકલપ્રાણિષ્વાત્મદર્શનં વિધાય સ્વાર્થદૃષ્ટ્યૈવ મહાકરુણાર્દ્રઃ સર્વોપકારકરણમેવ સ્વાર્થં વિદધાતિ ।

“સર્વભૂતસ્થમાત્માનં સર્વભૂતાનિ ચાત્મનિ” (શ્રીમદ્ભગવદ્ગીતા - ૬.૨૯) ઇતિ ગીતોક્તિરત્રૈવ  સાફલ્યમશ્નુતે । અત્ર પરાર્થોઽપિ સ્વાર્થો ભવતિ, સ્વવ્યતિરિક્તસ્યૈવાભાવાત્ । ધર્મોઽયં માનવસ્ય સામાજિકજીવનમુન્નતભૂમૌ નિધાયાશુભહીનસ્વાભાવિકીં પ્રવૃત્તિં દૂરીકૃત્યોદારોદાત્તવિચારમાવિષ્કૃત્ય ભારતીયમાનવતાં સમ્પાદ્યાત્માનુગ્રહાભાવેઽપિ ભૂતાનુગ્રહાર્થં નિવૃત્તિભૂમિકાં પ્રવૃત્તિં પ્રસૂતે । આત્મનઃ પ્રતિકૂલાનિ પરેષાં કૃતે નાચરણીયાનીત્યેવ ભારતીયનિધિઃ
।

પ્રવૃત્તિનિવૃત્તિભેદાદ્ જ્ઞાનવિમલધારા દ્વિધા વિભક્તેવ પ્રતીયતે; કિન્તુ લોકોપકારકરણાય સદાઽઽર્દ્રચિત્તસ્ય મનીષિણો નિવૃત્તિમાર્ગ ઉદાસીનમાર્ગો વા નૈવ સમ્ભાવ્યતે, યતો લોકદુઃખાસહિષ્ણુત્વમેવ તપસિ પ્રવર્ત્તયતિ અત્રત્યાન્ સાધકજનાન્ જ્ઞાનજ્યોતિઃસમ્પન્નાન્ । કથમસૌ બુદ્ધઃ સન્ લોકોપકારવિરતો ભવેત્ ? યતો

મૂલસ્યોપક્રમસ્યોપસંહારે ઉચ્છેદાત્ । યત ઔદાસીન્યં ભજમાનાસ્તે તપઃપ્રવૃત્તિં પ્રતિ મૂલાધારમેવ પરિજહ્યાત્, અતો ભારતીયનિવૃત્તિમાર્ગ ઉદાસીનમાર્ગો વા વ્યષ્ટિહિતમવિગણય્ય સમષ્ટિહિતસાધનાયા એવોપસંહૃતઃ સમસ્તં વિશ્વમેકનીડમવલોકયન્તોઽખણ્ડચરાચરં વિશ્વં વાસુદેવમાકલય્ય તદ્ધિતકામનયૈવ નિવૃત્તિમાર્ગ ઉદાસીનમાર્ગો વા, અન્યથા નિવૃત્તિમાર્ગાચાર્યાણામુદાસીનમતપ્રવર્તકાનાઞ્ચાચારઃ સર્વથા સિદ્ધાન્તસામઞ્જસ્યં પરિત્યજેત્ । ચરાચરકલ્યાણાય તેષામશેષજીવનયાપનં સર્વથા નિવૃત્તિમાર્ગસ્ય તથાર્થત્વાભાવે કથં તજ્જીવનં સાફલ્યં ભજેત ? વિશિષ્ટભાવભૂમિમાશ્રિત્ય દેશસ્ય સમાજસ્ય સમવાયસ્ય ચ હિતકામનયા સમષ્ટ્યભ્યુદયાયૈવૈતેષાં બાધાશૂન્યા જીવનયાત્રા પ્રવહતિ । સઞ્ચરણસ્ય શ્રેષ્ઠસાધનતા વ્યષ્ટ્યનાસક્તૌ સન્નિહિતાસ્તિષ્ઠન્તિ ।

આર્યભાવનાદિવાહનં વૈદિકસાહિત્યમેવ । આર્યૈઃ સહ પારસીકાનાં નિવાસૈક્યાદેવોભયોર્ભાવનાયાં “જ્યોતિષઃ” આરાધનસ્ય દેવસ્તવનપરમ્પરાયાશ્ચ સામ્યં ।

વિષ્ણુપુરાણસ્ય તૃતીય-ચતુર્થાધ્યાયયોઃ સગરનૃપસ્ય કથોપલભ્યતે । તન્નિર્દેશેન પહ્લવાદિપ્રાચીનપારસીકાનાં વેદસ્ય યજ્ઞસ્ય ચ સાધનાયામનધિકારઃ સમજનિ । આસીચ્ચાદેશઃ શ્મશ્રુમુણ્ડનં તૈઃ કર્તું ન શક્યત ઇતિ । અતો વૈદિકભાવનાયા અન્તઃપ્રકૃતેઃ સર્વથા પરિવર્તનં તત્રાપિ ન જાતમ્ । અસ્યા ભાવનાયા ઇતિહાસાનુધાવને વૈદિકસાહિત્યમેવ ધ્રુવપદરૂપેણ વર્તત ઇત્યત્ર નાસ્તિ કાપિ સચેતસાં વિપ્રતિપત્તિઃ ।

મન્ત્રેષુ વર્તમાનરહસ્યાનામાવિષ્કાર ઉપનિષદાદિષુ વિદ્યતે । જ્ઞાનકર્મણોર્મધ્યે ભેદોપલબ્ધિઃ પરવર્તિકાલવર્તિની । અત એવ ગીતાયાં જ્ઞાનયજ્ઞસ્ય કર્મયજ્ઞાપેક્ષયા શ્રેષ્ઠત્વં સર્વેષાં કર્મણાં જ્ઞાને પરિસમાપ્તિશ્ચ પ્રકટિતા । કર્મભિઃ સ્વર્ગપ્રાપ્તિર્જ્ઞાનેન ચ મોક્ષપ્રાપ્તિરિતીમં ભેદમાદાય સ્વર્ગોઽભિલાષોપનીતવસ્તુપ્રાપ્તિસ્થાનમ્ । અપવર્ગસ્ય સ્વરૂપં તુ તત્તદ્દાર્શનિકચિન્તિતં શાસ્ત્રે સુસ્પષ્ટમેવ ।

વેદાર્થસ્ય વિશ્લેષણેનૈતત્સુસ્પષ્ટમાભાતિ યદ્ આત્મચેતનાયા લોકોત્તરચિન્મયભૂમેરુત્તીર્ણમેવ ક્રિયાકલાપાનાં લક્ષ્યમિતિ । અતશ્ચિન્મયભૂમિરેવ સ્વર્ગઃ । સ્વર્ગાપરપર્યાયસ્વઃ ઇત્યનેન જ્યોતિર્મય ભૂમેરનુભવ એવ પ્રમાણમ્ । તત્ર ગમનમેવ સ્વર્ગઃ । બ્રાહ્મણવ્યાખ્યયા જ્ઞાનયજ્ઞલભ્યમોક્ષેણ સહ દ્રવ્યયજ્ઞલભ્ય “સ્વઃ” ઇત્યસ્ય ભેદઃ કાલ્પનિક એવ ।

ક્રિયાકલાપનિર્વાહકત્વેન રૂપેણ યજુર્વેદસ્ય પ્રસિદ્ધિસ્તત્રૈવ ચાન્તિમાધ્યાયે ઈશોપનિષદઃ સન્નિવેશોઽસ્તિ । ઇયમુપનિષદ્ સંહિતાયામન્તર્ભુક્તા । યજુર્વેદસંહિતાશેષાધ્યાયે ઉપનિષદઃ ઉપસ્થાપનમતિશયમહત્ત્વપૂર્ણમ્, તત્રોદારોદાત્તદૃષ્ટ્યા સમન્વયસ્યાતુલનીયા ચેષ્ટા વર્તતે । કર્મવેદશેષે સાર્વભૌમજ્ઞાનાવતારપ્રદીપોઽયં પ્રજ્વલિતઃ સર્વેષાં કર્મણાં તત્ત્વજ્ઞાને ઉપસંહારઃ કિં ન કૃતઃ ? યાજ્ઞવલ્ક્યઃ કૃષ્ણયજુર્વેદધારાં શુક્લયજુર્વેદધારાયાં પ્રવાહિતવાન્ । કૃષ્ણસ્ય કર્મણોઽજ્ઞાનરૂપાયા અવિદ્યાયાશ્ચ શુક્લે કર્મણિ વિદ્યાયાં વાઽવતારણમેતસ્ય મુખ્યમુદ્દેશ્યમ્ । શુક્લયજુર્વેદપ્રવર્તકયાજ્ઞવલ્ક્યસ્યોપનિષદિ પ્રાધાન્યમાવહતોઽભેદેનાદિજ્ઞાનકર્મણોરૈક્યં સુનિશ્ચિતમ્ ।

વૈદિકસાહિત્યાધ્યાત્મભાવસાધનાયાં શ્રદ્ધાયા મહત્ત્વં વર્તતે । કર્મણિ શ્રદ્ધાયાઃ, આવેગસ્ય ચાનન્યસાધારણં મહત્ત્વમ્ । શ્રદ્ધયૈવ સહ માનવચિત્તસ્યાપરાપિ વૃત્તિઃ મનનમ્, યસ્ય ચાપરપર્યાય ઊહસ્તર્કો વા । તર્કસ્ય દૃષ્ટિઃ પ્રત્યક્વૃત્તા, યત્ર ચ જિજ્ઞાસાન્તર્નિહિતા । જિજ્ઞાસૈવ સાધનમ્, અસ્યાઃ સાધનાયા ઉપસંહાર આત્મવાદેઽપવર્ગે વા

। "આત્મા વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યઃ" (બૃ૦ ઉ૦ ૨।૪।૫ ।) ઇતિ બૃહદારણ્યકોપનિષદઃ સારતમોऽયમુપદેશઃ ભારતીયદર્શનસ્ય સારઃ નિર્યાસો વા । ભારતીયજનમનસો જીવનપ્રવાહો મુનીનાં સર્વા આશાઃ, આકાઙ્ક્ષાશ્ચ અસ્મિન્નેવ પર્યવસિતાઃ પ્રિયતમાં મૈત્રેયીમુપદિશ્ય યાજ્ઞવલ્ક્યઃ પૂર્વોક્તં નિવૃત્તિમાર્ગં સઞ્જગ્રાહ । એતમેવોપદેશમાદાય ભારતીયદર્શનશાસ્ત્રસ્યાસઙ્ખ્યા ધારા વાવહ્યન્તે, આત્મસાક્ષાત્કારસ્યાપવર્ગસ્ય કારણં શ્રવણં મનનં નિદિધ્યાસનઞ્ચેતિ આત્મવાદધારા મુનિધારા । દેવત્વમાત્મત્વઞ્ચોભયમપ્યતીન્દ્રિયમેવ । અતો દેવદર્શનમાત્મદર્શનં વા ભવતુ, અપ્રાકૃતત્વમુભયત્ર તુલ્યમેવ । દેવત્વં ભવતુ આત્મત્વં વા મૂલે જ્ઞાને પ્રસારણસ્ય, વ્યાપકત્વસ્ય વિરાજોऽનુસ્યૂતિરનવચ્છિન્ના પ્રવહતિ । આત્મચેતના પરમે ચરમે સત્યે વિશ્રાન્તિ લભતે કર્મભાવનયા દેવત્વભાવનયા દ્રુતચિત્તહૃદયસ્યાવેગેન બોધિગ્રાહ્યવસ્તુસ્વરૂપતાદાત્મ્યેનાત્મસ્વરૂપસ્યૈવાભિરસ્તિ ।

એતત્તુ સત્યમ્, એક આવેશકલ્પિતો વિપ્રોऽપરઃ પૌરુષદૃપ્તો નરઃ । એકત્ર શ્રદ્ધા પ્રાધાન્યેનાપેક્ષિતાऽપરત્ર તર્કઃ, બોધિર્વા । ઇમે મૌલિકચિત્તવૃત્તી આશ્રિત્ય સાધનાયાઃ પરવર્તિકાલે ભેદઃ સઞ્જાતઃ, એકા ઋષિધારા, અપરા ચ મુનિધારા । દર્શનં મનનસાધ્યમ્, મનનાચ્ચ મુનિઃ ।

એતયોઃ સાધનયોઃ સુસ્પષ્ટો નિર્દેશઃ પાતઞ્જલયોગદર્શને સૂત્રાભ્યાં વર્તતે, ઉભયોઃ સમન્વયશ્ચ । તથા હિ - "સમાધિવશાદાત્મદર્શનમીશ્વરપ્રણિધાનાદ્વા(૧)" ।(૧. યો૦ સૂ૦ ૧.૧.૨૩ ।) તત્રેશ્વરસ્વરૂપનિરૂપણાનન્તરમુક્તમ્ - "તસ્ય વાચકઃ પ્રણવઃ (૨)"। (૨. તદેવ - ૧.૧.૨૭ ।)

અત્ર વ્યાખ્યાયાં "પ્રકર્ષેણ નૂયતે સ્તૂયતેऽનેનેતિ નૌતિ સ્તૌતિ વા પ્રણવ ૐકારઃ । તયોશ્ચ વાચ્યવાચકભાવલક્ષણઃ સમ્બન્ધો નિત્યઃ સમ્બન્ધેન પ્રકાશ્યતે, ન તુ કેનચિત્પ્રકાશ્યતે (૩)"। (૩. તદેવ - ૧.૧.૨૭ મોજવૃત્તિઃ ।)
અદૃષ્ટવિગ્રહો દેવ ભાવગ્રાહ્યો મનોમયઃ ।
તસ્યોઙ્કારઃ સ્મૃતો નામ તેનાહૂતઃ પ્રસીદતિ (૪) ॥ (૪. તદેવ ।)
ૐ શબ્દસ્ય અવ્યયત્વં । અસ્ય નિર્વચનમુણાદિસૂત્રેણ જાયતે । રક્ષણાર્થકો અવ્ધાતોઃ "અવતેષ્ટિલોપશ્ચ" (ઉ૦ સૂ૦ ૧૩૯) ઇત્યનેન સૂત્રેણ મન્પ્રત્યયઃ । મન્પ્રત્યસ્ય ટેઃ "અન્" ઇત્યસ્ય લોપોऽપિ ભવતિ । યદિ પ્રકૃતેષ્ટેર્લોપઃ સ્યાત્, તદા ડિત્કરણેનૈવ "ટેઃ (૫)" (૫. અષ્ટા૦ ૬.૪.૧૮૩ ।) ઇત્યનેનૈવ ટિલોપસિદ્ધેઃ, ટિલોપવિધાનં વ્યર્થં સ્યાત્ । તસ્માત્ પ્રત્યસ્યૈવોદ્દેશ્યત્વં । "જ્વરત્વરસ્તિવ્યવિમવામુપધાયાશ્ચ (૬)" (૬. તદેવ - ૬.૪.૨૦ ।) ઇત્યનેન વકારસ્ય ઊઠિ અકારવકારસ્થાનિકયોરૂઠોર્દીર્ઘે કૃતે ૐ મિતિ નિષ્પન્નમ્, તયોર્દીર્ઘે કૃતે ગુણે ઓમિતિ ।

ૐઇત્યસ્ય "ઓ૩મ્" ઇત્યેવં રૂપેણાપિ લેખો દૃશ્યતે । પરં વ્યુત્પત્ત્યા સિદ્ધસ્ય "ઓમ્" ઇત્યેવ લેખઃ સમીચીનઃ "ઓ૩મ્" ઇતિ તુ ઉચ્ચારણાતુરૂપલેખ આગ્રહવશાદુન્નેયઃ ।

અમરકોષે ટીકાયાઞ્ચ - "ઓઙ્કારપ્રણવૌ સમૌ (૭)" (૭.અ૦ કો ૦ ૧૬.૮.) ઇત્યસ્ય વ્યાખ્યાને રામાશ્રમીટીકાયામુક્તમ્- "અવતિ । અવતેષ્ટિલોપશ્ચ (ઉ૦૧.૧૪૨)ઇતિ મન્પ્રત્યયસ્યૈવ ટિલોપઃ । "જ્વરત્વર૦" (અષ્ટા૦ ૬.૪.૨૦) ઇત્યૂઠૌ । ગુણઃ (૬.૩.૮૪), વષટ્કારઃ (૧.૨.૩૫) ઇતિ લિઙ્ગાત્સમુદાયાદપિ કારપ્રત્યયઃ" (વા ૩.૩.૧૦૮)।

"प्रणूयते स्तूयते । नु स्तुतौ । "ऋदोरप्" (अष्टा० ३.३.५६)"उपसर्गात्०" (अष्टा० ८। ४।१४) इति णत्वम्" इति द्वे ॐ कारस्य" ।

અમરકોષસ્યૈવ તૃતીયકાણ્ડે "ઊમ્" ઇતિ શબ્દસ્ય નિર્વચનપ્રસઙ્ગે ઉચ્યતે ઇતિ ઊ । "ઊયી તન્તુસન્તાને" ઇતિ મુક્પ્રત્યયઃ (રામા૦ ૩.૪.૧૮)। અયમપિ શબ્દોઽવ્યય એવ, યદ્યપ્યર્થભેદઃ ।

"ઉમા" ઇત્યપિ શબ્દો વર્તતે । અસ્ય શબ્દસ્ય વ્યાખ્યાને ઉક્તં - "ૐ શિવં માતિ, મિમીતે વા । મા માઙ્ માને - "આતોઽનુપ૦" (અષ્ટા૦ ૩.૨.૩) ઇતિ કઃ । ઊવતે ઊયતે વા, ઊઙ્ શબ્દે વિભાષા તિલમાષોમા (૫.૨.૪) ઇતિ નિપાતનાત્મક્ ઇતિ । અત્ર ઉમાશબ્દ નિર્વચનેઽપિ અવ્ ધાતોસ્તસ્ય નિષ્પત્તિઃ સૂચિતા । અત ઓમિત્યનેન સહ ધાતુકૃતં સામ્યં વર્તતે ।

કેનોપનિષદિ ઉમાયાશ્ચર્ચા વિદ્યતે । ખણ્ડદ્વયેન નિર્ગુણસ્ય નિર્વિશેષસ્ય બ્રહ્મણઃ સ્વરૂપં પ્રતિપાદ્યાપિ તદ્બ્રહ્મતત્ત્વં મન્દબુદ્ધિભિર્નાકલયિતું શક્યમિતિ તૃતીયચતુર્થખણ્ડયોઃ સગુણં બ્રહ્મ પ્રતિપાદિતમ્ । અવિજ્ઞાતં વિજાનતાં વિજ્ઞાતમવિજાનતામિતિ નિરુપાધિબ્રહ્મસ્વરૂપશ્રવણાન્મૂઢાશ્ચિન્તયેયુર્યદ્ યતો બ્રહ્મણોઽવિજ્ઞાતત્વમતો બન્ધ્યાપુત્રાદિવદસત્ત્વમલીકત્વમેવ સ્યાત્ । અતો દેવાત્ પરં પૂર્વેષામપિ કાલાનવચ્છેદાદ્ ગુરુભૂતં બ્રહ્માખ્યાયિકયા પ્રતિપાદયામાસ। બ્રહ્મજ્ઞાનાદેવ કસ્યાપિ દેવસ્ય શ્રેષ્ઠત્વં જાયતે । અતો બ્રહ્મવિદ્યાસ્તુત્યર્થેયમાખ્યાયિકા ।

અસ્યામાખ્યાયિકાયાં દેવેભ્યોઽર્થાય સ્વમાહાત્મ્યનિર્મિતેનાત્યદ્ભુતેન વિસ્માપનીયેન રૂપેણ દેવાનામિન્દ્રિયગોચરેણ પ્રાદુર્વભૂવ । પ્રાદુર્ભૂતં બ્રહ્મ નૈવ વિજ્ઞાતવન્તો દેવા કિમિદં પૂજ્યં મહદ્ભૂતમિતિ । પૂજાર્થકાદ્ યક્ષતેર્ધાતોર્નિષ્પન્નત્વાદ્ યક્ષં પૂજ્યમિત્યર્થઃ ।

યથાગ્નિસ્તૃણમપિ દગ્ધુમસમર્થઃ સન્નિવૃત્તો બભૂવ, યક્ષસ્વરૂપજ્ઞાને સ્વસ્ય વિફલતાં ચ દેવેભ્યો નિવેદયામાસ, તથૈવ વાયુરપિ સર્વસ્યાદાને નિતરામભિમાનયુક્તોઽપિ તૃણસ્યાપ્યાદાને કૃત્સ્નમપિ સ્વશક્તિં વિફલીભૂતમાલોક્ય પરાજયમઙ્ગીકૃત્ય દેવેભ્યઃ પ્રાહ - નૈતદ્ યક્ષં વિજ્ઞાતું પ્રભવામીતિ ।

યક્ષસ્વરૂપં જ્ઞાતુમસમર્થાવગ્નિવાયૂ નિવૃત્તૌ । દેવાઃ સર્વે સમ્ભૂય દેવરાજમિન્દ્રમુપેત્યોચુઃ - ભવાન્ ખલુ દેવાનાં શ્રેષ્ઠો બલિષ્ઠશ્ચ । તદ્ ગમ્યતાં યક્ષસ્વરૂપં ચ વિજ્ઞાયતામિતિ । જિજ્ઞાસુરિન્દ્રો યક્ષમુપગતઃ, યક્ષં ચ તસ્માત્ સમીપવર્તિન ઇન્દ્રાત્તિરોભૂતમ્ । દેવશ્રેષ્ઠત્વેન નિતરામભિમાનવત ઇન્દ્રસ્યાભિમાનો નિરાકર્ત્તવ્ય ઇતિ યદ્ યક્ષમગ્નિના વાયુના સંવાદં કુર્વદપિ નેન્દ્રં કિમપિ બભાષે । એવમભિમાનશાતનેઽપિ નાસાવિન્દુસ્તત્સ્થાનં તત્યાજ । તસ્મિન્નેવાન્તરિક્ષે સ્થિતો ધ્યાયન્નાસીત્ - કિમિદં યક્ષમિતિ ? એવમિન્દ્રસ્ય યક્ષે ભક્તિં જ્ઞાત્વા વિદ્યૈવ સ્ત્રીસ્વરૂપમાશ્રિત્ય પ્રાદુર્ભૂતા । ઇન્દ્રસ્તત્રોમાસ્વરૂપિણીં વિદ્યાં બહુશોભમાનામાલોકિતવાન્ । સ્વયંપ્રકાશસ્ય બ્રહ્મણ ઉજ્જ્વલતમત્વાત્ "તસ્ય ભાસા સર્વમિદં વિભાતિ (૧)" (૧. ક૦ ઉ૦ ૫.૧૫ ।)ઇતિ ચ શ્રુતેસ્તસ્યા ઉમાયાઃ શોભનતમત્વં સુષ્ઠુ યુજ્યતે । ઇયઞ્ચોમા હૈમવતીવ હેમાલઙ્કારભૂષિતા કાચન યથા નિતરાં શોભામાદધાના દૃશ્યતે, તથૈવોમાપિ ।

અદ્વૈતવાદે ભક્તિર્ન સિદ્ધાન્તવિરુદ્ધા; કિન્તુ ભવત્યા મોક્ષ ઇતિ નાઙ્ગીકૃતં । વૈષ્ણવૈર્ભક્ત્યા મોક્ષ ઇતિ સિદ્ધાન્તોઽઙ્ગીક્રિયતે । ઉપાસનાદિના ચિત્તશુદ્ધૌ સત્યાં ક્ષપિતે કલ્મષે જ્ઞાને ચ લબ્ધે જ્ઞાનાદેવ મોક્ષ ઇત્યુચ્યતે । સર્વજ્ઞેન રુદ્રેણ સહ નિત્યં વિદ્યમાનત્વાદ્ વિદ્યાસામર્થ્યમુપજગામેન્દ્રઃ ।

ઉમયા સહ રુદ્રસ્ય સર્વજ્ઞસ્ય વિવાહાદિકં સર્વં માયિકમેવાવગન્તવ્યમ્ । શક્તિસ્વરૂપાયા ઉમાયાઃ શક્તિમત ઈશ્વરસ્ય ચ પારમાર્થિકો ભેદો નાસ્તિ । એકસ્યૈવ જ્યોતિષ્મત્તમસ્ય બ્રહ્મણશ્ચિતિરૂપા શક્તિઃ । યથા બ્રહ્મ ચૈતન્યસ્વરૂપમ્, તથા તચ્છક્તિરપિ ચિતિરૂપૈવાત એવ ભાસ્કરરાયઃ - "એકમેવ બ્રહ્માનાદિસિદ્ધયા માયયા ધર્મી ધર્મશ્ચેતિ સૃષ્ટ્યારમ્ભે પ્રાથમિકમીક્ષણં "તદૈક્ષત બહુ સ્યાં પ્રજાયેય" ઇતિ "સોઽકામયત", તત્તપોઽકુરુત" ઇત્યાદિત્રિવિધશ્રુતિસિદ્ધજ્ઞાનેચ્છાક્રિયાસમષ્ટ્યાત્મકં સ એવ બ્રહ્મધર્મઃ । સ ચ ધર્મ્યભિન્ન એવ, સ્વાભાવિકી જ્ઞાનબલક્રિયા ચેતિ શ્રુતેઃ । તસ્યૈવ ધર્મત્વાચ્છક્તિરિતિ સંજ્ઞા । તદ્વતો ધર્મોઽપિ ન જડો ન જીવઃ; અપિ તુ ચિતિઃ સ્વતન્ત્રા વિશ્વાસસિદ્ધિહેતુરિત્યાદિશક્તિસૂત્રોક્તરૂપં બ્રહ્મૈવેત્યુપનિષત્સિદ્ધાન્ત(૨) ઇતિ ।(૨. ગુપ્તવતીટીકા - પૃ૦ ૯ ।)

શઙ્કુરાનન્દેનાપ્યુક્તમ્-અવિધા હિ કુરૂપા પિશાચી, તન્નાશકત્વાદ્ વિદ્યાયાઃ કાન્તિમત્ત્વમ્ । સંસારોચ્છેદિકાયા બ્રહ્મવિદ્યાયાશ્ચાધિકકાન્તિયુક્તત્વં સુતરાં સિદ્ધ્યતિ । ન કેવલં શઙ્કુરાનન્દસ્ય પ્રતિભાપ્રબુદ્ધમેતદ્વ્યાખ્યાનમ્; અપિ તુ શઙ્કુરાચાર્યેણ સમર્થિતમેતદ્વ્યાખ્યાનમ્ । વાક્યભાષ્યે ચ કુરૂપસ્યાપિ વિદ્યાવતો શોભાયુક્તત્વમુક્તમ્ । પરાં વિદ્યાં બ્રહ્મવિદ્યાં વેત્તિ યા તસ્યા ઉમાયા બહુશોભનત્વં ભવત્યેવ ।

ઉમાયા ૐ કારચિતિશક્તેરખણ્ડાનન્તાનન્દચૈતન્યાત્મકત્વં દુર્ગાયાઃ સ્પષ્ટમુદ્ઘોષિતં દુર્ગાયામ્ -
ત્વં વૈષ્ણવીશક્તિરનન્તવીર્યા વિશ્વસ્ય બીજં પરમાસિ માયા ।
અમ્મોહિતં દેવિ સમસ્તમેતત્ત્વં વૈ પ્રસન્ના ભુવિ મુક્તિહેતુઃ ॥
વિદ્યાઃ સમસ્તાસ્તવ દેવિ ભેદાઃ સ્ત્રિયઃ સમસ્તાઃ સકલા જગત્સુ ।
ત્વયૈકયા પૂરિતમમ્બયૈતત્કા તે સ્તુતિઃ સ્તવ્યપરા પરોક્તિઃ ॥ (દુર્ગાસપ્તશતી - ૧૧.૫-૬ ।)
અસ્મિન્ પદ્યે વૈષ્ણવી ઇત્યનેન વ્યાપકત્વં સૂચિતમ્ । મહાભારતેઽપિ -
ત્વં બ્રહ્મવિદ્યા વિદ્યાનાં મહાનિદ્રા ચ દેહિનામ્ ।
સ્કન્દમાતર્ભગવતિ દુર્ગે કાન્તારવાસિનિ ॥
સ્વાહાકારઃ સ્વધા ચૈવ કલા કાષ્ઠા સરસ્વતી ।
સાવિત્રી વેદમાતા ચ તથા વેદાન્ત ઉચ્યતે ॥ (મહાભા૦ ભી૦ પ૦ ૨૩.૧૧-૧૨ ।)
અસ્મિન્ પ્રસઙ્ગે દિવ્યચેતનાયાઃ ક્રમિકોન્મેષ ઉપલભ્યતે । અગ્નેઃ, વાયોઃ, ઇન્દ્રસ્ય, બ્રહ્મશક્તેઃ, ઉમાયાઃ, બ્રહ્મણઃ, ઓઙ્કારસ્યાખણ્ડજ્યોતિરૂપેણ ઉપલબ્ધિરસ્તિ ।

ઉમાશબ્દસ્ય તૈત્તિરીયારણ્યકે "ખિલઃ ઉમાપતયે" (તૈ૦ આ૦ ૧ ।૨૨ ।) પ્રયોગ ઉપલભ્યતે । આધુનિકા અનાર્ષભાવનોદ્ભાવિતચેતસ ઉમોમાપતી પાર્વત્યદેવત ઇતિ । અત એવ ભૂમધ્યસાગરતીરસ્થપ્રાચીન - "Mother Goddess" ઇત્યાખ્યયા ઉમયા સાદૃશ્યમપિ પ્રતિપાદયન્તિ । પૂર્વોક્તસ્ય વિશ્લેષણપ્રસઙ્ગે શઙ્કુરાચાર્યઃ કથયતિ - "સ તસ્મિન્નેવાકાશે સ્ત્રિયમાજગામ બહુશોભમાનામુમાં હૈમવતીમ્" । અત્ર હૈમવતીવોમાપિ સ્ત્રીશબ્દસ્ય વિશેષણમેવેતિ સ્વીકાર એવ સાધ્વન્વયઃ સઙ્ગચ્છતે, અર્થાદ્ ઇન્દ્રોઽસ્મિન્ મહાશૂન્યે ચરન્ એકાં સ્ત્રીમૂર્તિમુપજગામ, યા બહુશોભમાના ઉમા હૈમવતી વા ।

ઋગ્વેદે "ઊમ" અવ્ પ્રત્યયઘટિતો વિશેષણશબ્દો બહુધા પ્રયુક્તઃ । (ઋ૦ સં૦-૪.૧૯.૧, ૫.૫૧.૧, ૭.૩૯.૪, ૧૦.૬.૭, ૩૧.૩.૩૨, ૫.૭૭.૮, ૧૨૦.૧.૩ ।) એકત્ર ઉમાસઃ ઇત્યેષ શબ્દઃ પ્રયુક્તઃ (ઋ૦ સં૦ ૧ . ૩ . ૬)। ઓમન્ શબ્દસ્ય બહુધા પ્રયોગો વિદ્યતે । આકાશવાચી વ્યોમન્ "વિ + ઓમન્" શબ્દોઽપિ અનવચ્છિન્નવૈપુલ્યસ્ય, પ્રસાદસ્ય, પરિરક્ષણસ્ય ચ બોધકઃ । ઉમા શબ્દોઽપિ એતચ્છબ્દસગોત્ર ઇતિ પુન્દેવતાયા વિશેષણમ્ । "ૐ" એવં સ્ત્રીદેવતાયા વિશેષણં "ઉમા" ઇતિ । હ્રસ્વદીર્ઘયોર્વ્યત્યયેઽપિ માત્રાયાઃ સામ્યં સાધુ સઙ્ગચ્છતે । તથા ચોમાશબ્દાર્થઃ પાલયિત્રી આનન્દયુક્તા વેતિ । અતઃ "ઉમા" પરમવ્યોમ્નઃ શક્તિરિત્યત્ર નાસ્તિ વિપ્રતિપત્તિઃ । યક્ષશબ્દસ્ય રહસ્યે અર્થે પ્રાચીનપ્રસિદ્ધિર્વર્તતે । "ન યાસુ ચિત્રં સદૃશે ન યક્ષમ્" કેનોપનિષદિ પ્રયુક્તો યક્ષશબ્દઃ રહસ્યાર્થકસ્તથા બ્રહ્મ રહસ્યમિતિ આખ્યાયિકાયાં લભ્યોઽર્થઃ । એતેનાભિવ્યજ્યમાનોઽર્થોઽત્ર શક્તિમત્તયા તદ્રહસ્યં ન લભ્યમ્; અપિ તુ પ્રસાદલભ્યં તત્ ।

દુર્ગાસપ્તશત્યાખ્યાયિકાનુધાવનેઽપિ શક્તિમત્તાનાં વિનાશઃ કૃપાકાઙ્ક્ષિણામારાધનતત્પરાણાં તત્પ્રસાદલભ્યં તદ્રહસ્યં સુરથસમાધ્યોઃ સુલભં સઞ્જાતમ્ । "યમેવૈષ વૃણુતે તેન લભ્યઃ" ઇતિ શઙ્કરાચાર્યકૃતા હૈમવતીશબ્દસ્ય દ્વિવિધા વ્યાખ્યા સમીચીનૈવ । હિમવતઃ પુત્રી, હેમાલઙ્કારભૂષિતા ચ । યત ઐન્દ્રી ચેતનાયા આવિર્ભૂતા મહાકાશે મૂર્તિઃ હિરણ્મયી, અથવા સા ચેતનાયા શુભ્રતુઙ્ગતામાવિર્ભૂતા । એષોઽર્થો ન કપોલકલ્પિતઃ અપિ તુ ઋગ્વેદસમર્થિતઃ । વેદે વિષ્ણુઃ "ગિરિષ્ઠાઃ "(૧.૧૫૪.૨)"વા ગિરિક્ષિત્ " (૧। ૧૫૪.૩),"ઇન્દ્રોઽપિ એષ એવ "(૧૦.૧૮૦.૨), "સોમોઽપિ "(૩.૪૮.૨)।

તૈત્તિરીયસંહિતાયાં રુદ્રાર્થે ગિરીશશબ્દસ્ય પ્રયોગઃ "ગિરીશન્તુ" (૪.૫. ૧. ૧), "ગિરીશ" (૪.૫.૧.૨), "નમો ગિરીશાય શિપિવિષ્ટાય ચ "(૪.૫.૫.૧)।

અત્રેદં ધ્યેયમ્-ઋગ્વેદે શિપિવિષ્ટો વિષ્ણુઃ (ઋ૦ ૭.૯૯.૭), વાજસનેયસંહિતાયાં ગિરીશય (વા૦ સં૦ ૧૬.૨૯), હિમાચલસ્ય તુષારશ ૃઙ્ગસ્ય મહિમા રુદ્રસ્ય શિવરૂપસ્યાત એવાસૌ ગિરીશઃ । એતન્મહત્ત્વં હિ ઋક્સંહિતાયા હિરણ્યગર્ભસૂક્તેઽપિ વિદ્યતે- "યસ્યેમે હિમવન્તો મહિત્વા" (૧૦.૧૨૧.૪)। એતદ્ધિમવત એવ હૈમવતી। તૈત્તિરીયસંહિતાયાં સા રુદ્રસ્ય દુહિતા અમ્બિકાનામ્ની । તદ્યથા - "એષ તે રુદ્રભાગઃ સહ સ્વસ્તમ્બિકયા તં જુષસ્વ" (તૈ૦ સં૦ ૧.૮.૬.૧) । અતઃ કેનોપનિષદિ ઉપલબ્ધા મૂર્તિરાચાર્યશઙ્કરદૃષ્ટ્યા બ્રહ્મવિદ્યારૂપિણી, યા ઋક્સંહિતાયાં "વાક્" । સા ચ ન સુલભદર્શના "જાયેવ પત્ય ઉશતી સુવાસા" (ઋ૦ સં૦ ૧૦.૭૧.૪)બ્રહ્મ વાક્ ચ યુગનદ્ધમિથુનભૂતે (ઋ૦ સં૦ ૧૦.૧૧૪.૮)। પુરાણાદૌ ચૈતસ્યૈવ રહસ્યસ્ય પરિપલ્લવનમ્।

એતાવતા પ્રબન્ધે "ઉઁમ્" ઇત્યનેન વ્યોમ્ન બ્રહ્મણ આધિદૈવિકોઽભેદઃ સમ્પન્નઃ, ઇદાનીં વ્યોમ્નો વિશ્લેષણેનોમ્ ઇત્યસ્યાભિપ્રાયોઽભિવ્યક્તતમો ભવિતા ।

બૃહદારણ્યકોપનિષદિ અષ્ટમબ્રાહ્મણે ગાર્ગ્યઃ પ્રશ્નૌ વિદ્યેતે યાજ્ઞવલ્ક્યં પ્રતિ । તૌ ચ પ્રશ્નાવાવેશસમ્પન્નૌ । તયોક્તં યદ્ યદિ અનયોઃ પ્રશ્નયોરુત્તરં વિધાસ્યતે, તદા બ્રહ્મવિચારે ત્વં વિજયીત્યત્ર નાસ્તિ કાચિદ્વિપ્રતિપત્તિરિતિ । "યદુપરિ દિવઃ = અણ્ડકપાલાત્, યચ્ચાધોઽણ્ડકપાલાત્, યચ્ચાણ્ડકપાલયોઃ દ્યાવાપૃથિવ્યોર્મધ્ય યદ્ભૂત વર્તમાનં

ભવિષ્યચ્ચ, યત્સર્વમેતદાચક્ષતે, તત્સર્વં દ્વૈતજાત કસ્મિન્નેકો ભવતિ ।”

યાજ્ઞવલ્ક્યેનૈતસ્ય સમાધાનપ્રસઙ્ગે ઉક્તમ્ - યદેતદ્વ્યાકૃત સૂત્રાત્મકં જગદ્ અવ્યાકૃતે આકાશે ઉત્પન્નં સ્થિતં લીનં ચ । અનન્તરં સોવાચાકાશઃ કસ્મિન્નોતશ્ચ પ્રોતશ્ચ । આકાશમેવ પરમવ્યોમ કાલત્રયાતીતત્વાદ્ દુર્વાચ્યમ્ । યાજ્ઞવલ્ક્યેનોક્તમક્ષરં યન્ન ક્ષીયતે ન ક્ષરતીતિ વા । અસ્યાક્ષરસ્ય સ્વરૂપમભિદધત્ કથયતિ - “અસ્થૂલમનણ્વહ્રસ્વમદીર્ઘમલોહિતમસ્નેહમચ્છાયમતમોઽવાય્વનાકાશમસઙ્ગમરસમગન્ધમચક્ષુષ્કમશ્રોત્રમવાગમનોઽતેજસ્ક ન તદશ્નાતિ કિઞ્ચન ન તદશ્નાતિ કશ્ચન (૧)” । (૧. છા૦ ઉ૦ ૧.૮.૮ ।) એતાવતૈકમેવાદ્વિતીયં તદક્ષરમીમિતિ । યતઃ “ઓમિત્યેકાક્ષરં બ્રહ્મોપાસીત (૨)” ઇતિ શ્રુતેઃ ।(૨ છા૦ ઉ૦ ૧.૧.૧ ।)

અસ્યામેવોપનિષદિ પઞ્ચમાધ્યાયે -
ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥ ( બૃ૦ ઉ૦ ૫.૧.૧ ।)
ઇત્યનેન વાક્યેન ખિલકાણ્ડમારભ્યતે । સારતઃ સઙ્ક્ષિપ્તં પૂર્વત્રાનુક્તં પરિશિષ્ટં ખિલં ભવતિ । ઋગ્વેદે શ્રીસૂક્તં ખિલાન્તર્ગતમ્ । યજુર્વેદે શિવસઙ્કલ્પઃ ખિલાન્તર્ગતઃ । અત્રાપ્યુપસંહારરૂપેણાનુક્તઃ સારાંશઃ સંગૃહીતઃ ।

એતસ્ય વ્યાખ્યાને શઙ્કરાચાર્યોઽભિધત્તે - “સર્વોપાસનશેષત્વેનોઙ્કારો દમં દાનં દયામિત્યેતાનિ ચ વિધિત્સિતાનિ । પૂર્ણં ન કુતશ્ચિદ્વ્યાવૃત્તમર્થાદ્ વ્યોમ એવ “ૐ” સર્વવ્યાપિત્વેન સિદ્ધ્યતિ। આકાશવદ્વ્યાપિ નિરુપાધિકમેવ “ૐ” । ઇદં પૂર્ણમિતિ બ્રહ્મ વા ઇદમગ્ર આસીદિત્યસ્યાર્થઃ । ઉપસંહાર આચાર્યેણોક્તં “યઃ સર્વોપનિષદર્થો બ્રહ્મ, સ એષોઽનેન મન્ત્રેણાનૂદ્યતે .॥ ઓઙ્કારદમદાનદયાખ્યાનિ .॥ સર્વોપાસનાઙ્ગભૂતાનિ ”ઇતિ ।

ભર્તૃપ્રપઞ્ચસમ્મતસ્ય વસ્તુતો દ્વૈતાદ્વૈતરૂપત્વાત્મસ્વરૂપસ્ય આત્મનઃ પ્રતિપાદનમપિ અનયૈવ શ્રુત્યોપલભ્યતે । કિઞ્ચ દ્વૈતાદ્વૈતાત્મકકાર્યકારણાત્મકપ્રતિપાદનમપિ અનયૈવ ૐ કારપ્રતિપાદિકયા શ્રુત્યોપલભ્યતે । તથા હિ-એકૈવ પૂર્ણતા કાર્યકારણયોર્ભેદેન વ્યપદિશ્યતે । એવઞ્ચ દ્વૈતાદ્વૈતાત્મકમેવ બ્રહ્મ યથા કિલ સમુદ્રો જલતરઙ્ગફેનબુદ્બુદાદ્યાત્મક એવ, યથા ચ જલં સત્યં તદુદ્ભવાશ્ચ તરઙ્ગફેનતરઙ્ગબુદ્બુદાદયઃ સમુદ્રાત્મભૂતા એવ આવિર્ભાવતિરોભાવધર્મિણઃ પરમાર્થસત્યા એવ, એવં સર્વમિદં દ્વૈતં પરમાર્થસત્યમેવ જલતરઙ્ગાદિ-સ્થાનીયમ્, સમુદ્રસ્થાનીયં પરં બ્રહ્મ । એતસ્ય ચ ખણ્ડનમાચાર્યેણ સમ્યગેવ કૃતમ્ ।

શાઙ્કરભાષ્યે અઙ્ગારસ્વરૂપં પ્રતિપાદયતા ઉક્તં યદ્ બ્રહ્મોપાસનસાધનત્વાર્થમોંશબ્દઃ પ્રયુક્તઃ । ઓમિતિ શંસત્યોમિત્યુદ્ગાયતિ ઇત્યેવમાદૌ સ્વાધ્યાયારમ્ભાપવર્ગયોશ્ચ ઓઙ્કારપ્રયોગો વિનિયોગાદવગમ્યતે, ન ચ તદર્થાન્તરમિહાગમ્યતે । તસ્માદ્ ધ્યાનસાધનત્વેનૈવેહોઙ્કારશબ્દસ્યોપદેશઃ । યદ્યપિ બ્રહ્માત્માદિશબ્દા બ્રહ્મણો વાચકાઃ; શ્રુતિપ્રામાણ્યાદ્ બ્રહ્મણો નેદિષ્ઠમભિધાનમોઙ્કારઃ । પ્રતીકત્વેનાભિધાનત્વેન ચ બ્રહ્મપ્રતિપત્તાવિદં પરં સાધનમ્ । વિષ્ણ્વાદિપ્રતિમાઽભેદેન પ્રતીકત્વેન ઊઙ્કારો બ્રહ્મેતિ પ્રતિપત્તવ્યઃ, “સત્યકામ પરં ચાપરં ચ બ્રહ્મ યદોઙ્કારઃ” (પ્ર૦ ઉ૦ ૫.૨ ।) ઇત્યાદિ વાક્યેન પ્રતીકત્વેન બ્રહ્મ પ્રતીયતે ।

વાચકત્વેનાપિ પ્રતીયતે ૐઙ્કારો યથા- - વેદોઽયમોઙ્કારો વેદ વિજાનાત્યનેન યદ્વેદિતવ્યમ્ । તસ્માદ્વેદ ઊઙ્કારો વાચકોઽભિધાનમ્ । તેનાભિધાનેન યદ્વેદિતવ્યં બ્રહ્મ પ્રકાશ્યમભિધીયમાનં વેદ, સાધકો વિજાનાત્યુપલભ્યતે,

તસ્માદ્ બ્રાહ્મણાનામભિધાનત્વેન સઃધનત્વમભિપ્રેતમોઙ્કારસ્ય ।

ઋગ્યજુઃ સામાદિભેદભિન્ન એષ ઊઙ્કારઃ । તદ્યથા - શઙ્કુના સર્વાણિ પર્ણાનિ ઇતશ્ચાયં વેદ ઊઙ્કારો યદ્વેદિતવ્યં તત્સર્વં વેદિતવ્યમોઙ્કારેણૈવ વેદૈનેન, અતોઽયમોઙ્કારો વેદઃ । પ્રયુજ્યમાને હિ ઓઙ્કારે સર્વો વેદઃ પ્રયુક્તો ભવતિ ।

અસ્ય વામીયસૂક્તસ્યાષ્ટાવિંશત્તમે મન્ત્રે દેહાત્મનો જીવાત્મનઃ સ્વરૂપનિરૂપણપ્રસઙ્ગે ઉભયોર્મધ્યે જીવાત્મનો યત્પારમાર્થિકં રૂપમ્, તદેવાસ્મિન્ મન્ત્રે પ્રકાશિતમ્ –
ઋચો અક્ષરે પરમે વ્યોમન્ યસ્મિન્ દેવા અધિવિશ્વે નિષેદુઃ ।
યસ્તન્ન વેદ કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ॥ (ઋ૦ સં૦ ૧.૧૬૪.૩૯ ।)
અસ્મિન્ મન્ત્રે ઋક્શબ્દેન ઋક્પ્રધાનસાઙ્ગાપરવિદ્યાત્મકચતુર્વેદાનાં નિર્દેશો વિદ્યતે । “દ્વે વિદ્યે વેદિતવ્યે પરા ચૈવાપરા ચ (૨)” (૨. મુ૦ ઉ૦ ૧ . ૪।) મુણ્ડકે એતદુપક્રમં કૃત્વા અનન્તરમુક્તમ્ - “તત્રાપરા ઋગ્વેદો યજુર્વેદઃ સામવેદઃ (૩)” (૩. તદેવ - ૧ .૫ ।) ઋચોઽક્ષરે ઇત્યસ્ય પદસ્યાર્થવેદસમ્બન્ધી અક્ષરઃ । અક્ષરશબ્દસ્યાર્થઃ ક્ષરણરહિતઃ, અનશ્વરઃ, નિત્યઃ, સર્વવ્યાપિ બ્રહ્મ । અક્ષરશબ્દશ્ચ બ્રહ્મવાચકઃ, તથોક્તં - “એતદ્વૈ તદક્ષરં ગાર્ગિ, બ્રાહ્મણા અભિવદન્તિ (૪)” (૪. બૃ૦ ઉ૦ ૩.૮.૮ ।) ઇત્યપિ ઉપનિષદિ પ્રસિદ્ધં ઋચોઽક્ષરસ્ય ચ પ્રતિપાદ્યપ્રતિપાદકભાવસમ્બન્ધઃ । ઋક્પ્રતિપાદકભૂતાક્ષરઞ્ચ પ્રતિપાદ્યભૂતમ્ । એતદેવોમ્, તચ્ચ સમસ્તવેદપ્રતિપાદ્યમ્ ।

વેદભાગેન યજ્ઞાદેઃ પ્રતિપાદનેઽપિ તદનુષ્ઠાનેન ચિત્તશુદ્ધિસમ્પાદનક્રમેણ વેદપ્રતિપાદિતયાગાદેરપિ બ્રહ્મવેદનસાધનતા વિદ્યતે । વેદસ્ય ઇતરભાગોઽપિ બ્રહ્મવિષયક એવ । અત એવ બૃહદારણ્યકોપનિષદિ “તમેતં વેદાનુવચનેન બ્રાહ્મણા વિવિદિષન્તિ યજ્ઞેન દાનેન તપસાઽનાશકેનેત્યનેન પ્રતિપાદિતમ્ । યથાઽસ્માભિઃ પૂર્વં નિગદિતં યદ્ વ્યોમન્ એવ ઓમિતિ, તસ્યૈવાક્ષરોદ્ગીથસ્ય પરમમિતિ વિશેષણં પરમે વ્યોમન્ (૫)”। (૫. તદેવ ।) ઉત્કૃષ્ટાર્થકપરમેતિ વિશેષણેનાકાશસદૃશસ્ય નિર્લેપત્વનીરૂપત્વ - વ્યાપ્તિત્વાદિસાદૃશ્યપ્રયુક્તં બ્રહ્મ વ્યોમન્શબ્દેનોચ્યતે લૌકિકાકાશસ્યાપરવ્યોમ્ના નિર્દેશઃ પરસ્ય બ્રહ્મણઃ પરમવ્યોમનામ્ના નિર્દિશ્યતે । લૌકિકાકાશનામ્ના બ્રહ્મવૈલક્ષણ્યદર્શનાર્થં પરમશબ્દસ્ય વ્યોમશબ્દવિશેષણરૂપેણ નિર્દેશઃ । અથ વા વ્યોમશબ્દાર્થો વિશેષરૂપેણ સકલરક્ષકઃ । રક્ષણાર્થકાવ્ધાતુના વ્યોમશબ્દસ્ય ૐ શબ્દસ્ય નિષ્પત્તિર્ભવતિ । યથા બ્રહ્મ સર્વાધિષ્ઠાનમ્, તથૈવાધિષ્ઠાનરૂપેણ બ્રહ્મ સર્વસ્ય રક્ષકમ્ । અસ્મિન્નેવોઙ્કારાત્મકે તત્ત્વે સમસ્તદૃશ્યપ્રપઞ્ચમધ્યસ્તમ્ ।

અત્રાન્યદપિ વિશેષિતમ્ - યસ્મિન્નોઙ્કારાત્મકે બ્રહ્મણિ દેવા અધિવિશ્વે નિષેદુઃ । અત્રૈવ સર્વે દેવા આશ્રિતાઃ । અક્ષરાત્મકોઙ્કારજ્ઞાનં વિના વેદસ્ય નિષ્પ્રયોજનત્વં કો નામ નિવારયિષ્યતિ ? અક્ષરાત્મકબ્રહ્મજ્ઞાનં વિના કિમપિ ન ભવિતુમર્હતિ, બ્રહ્મવિદેવ સ્વરૂપેઽવસ્થાનં પ્રાપ્નોતિ સર્વતાદાત્મ્યસ્વરૂપોઙ્કારોપાસનયૈવાક્ષરભાવતા પ્રાપ્યતે । શબ્દબ્રહ્મવાદસ્યૈતદેવ તાત્પર્યમ્ - “ઋચો અક્ષરે પરમે વ્યોમન્” । અતો વ્યોમાત્મકોઙ્કારત્વં સર્વથા શાસ્ત્રપ્રસિદ્ધં । નાદાત્મિકા પરાત્મિકા મૂલાધારસ્થા વાગેવોઙ્કારરૂપા । અત એવ ગીતાયામુક્તમ્- - “ ૐ તત્સદિતિ નિર્દેશો બ્રહ્મણસ્ત્રિવિધઃ સ્મૃતઃ (૧) ” ઇતિ । (૧. શ્રીમદ્ભગવદ્ગીતા - ૧૭.૨૩ ।) એતેન સ્વતઃસિદ્ધં પરં બ્રહ્મૈવ

तच्छब्देनोच्यते ।

प्रदर्शितेयमृग् व्याकरणदर्शनसिद्धान्तसिद्धस्य शब्दब्रह्मण आधारभूतेति समासेनोच्यते। निरुक्तेऽस्य मन्त्रस्य व्याख्याने त्रिविधोऽर्थ उक्तः, तथा हि-प्रथमं सायणसम्मतार्थं विलिख्योङ्कारस्वरूपं प्रदर्श्यानन्तरं यास्कव्याख्यानत्रयं विलिखामि ।

सायणाचार्येणोक्तमस्मिन् मन्त्रे जीवात्मनः पारमार्थिकं स्वरूपमुल्लिखितम् । यतो मुण्डकोपनिषदि शिक्षाकल्पादिसहितस्य वेदचतुष्टयस्यापरविद्याया निर्देशो विद्यते (२) । (२. मु० उ० १.४-५ ।) चतुर्वेदसम्बद्धात्मकाक्षरात्मके परमे व्योमनि द्योतनात्मका देवाः प्रतिष्ठिताः क्षरणरहितोऽविनश्वरं तत्त्वमक्षरम् । एतदर्थं नित्यं सर्वव्यापि एवाक्षरशब्दार्थः । अक्षरशब्दस्य ब्रह्मवाचकत्वम् । "एतद् वै तदक्षरं गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (३)" (३. बृ० उ० ३.७.८-९ ।) इत्यादिबृहदारण्यके प्रसिद्धिं लभते । एवमेव "अथ परा यया तदक्षरमधिगम्यते (४)" । (४.मु० उ० १.५ ।) एतन्मुण्डकवाक्येऽपि अक्षरशब्दस्य ब्रह्मवाचकत्वं सिद्धमेव । अग्रे "येनाक्षरं पुरुषं वेदसत्यम् (५)" । (५. तदेव - १.२.१३ ।) अतोऽत्र अक्षरशब्दो ब्रह्मवाचकः, तच्च ब्रह्म सर्ववेदप्रतिपाद्यम् । एतस्यैव ब्रह्मण ऋचोऽक्षरे इति मन्त्रभागेन प्रतिपादनम् अक्षरपदाभिधेयं ब्रह्म "परमं व्योम" व्योमशब्दस्य भूताकाशोऽर्थः, "परमव्योम" शब्दस्य परमाकाशो ब्रह्म वाऽर्थः । आकाशस्य यथा निर्लेपत्वम्, रूपरहितत्वं सर्वव्यापित्वं वाऽर्थः, ब्रह्मणोऽपि तथैव निर्लेपत्वं नीरूपत्वं सर्वव्यापित्वञ्च । अतः "परमव्योम" इत्यस्य शब्दस्य ब्रह्मणो निर्देशे न काप्यापत्तिः, तदेव "ओम्" । "आकाशस्तु तल्लिङ्गात् (६)" (६. वे० सू० १.१.२२ ।) एतत्सूत्रभाष्येऽपि शङ्कराचार्येण

एतस्या एव ऋचो घटकस्य मन्त्रस्य उद्धारः कृतः । एवम् आकाशः परमव्योम, "ख" इत्यादयः शब्दा ब्रह्मणो वाचकाः, ब्रह्मणात्मकः परमे व्योमनि सर्वे द्योतनरूपा देवा आश्रिता अवतिष्ठन्ते ।

"ऋचो अधि निषेदुः" अत्र "ऋक्" इति शब्देन समस्तवेदस्यैवावगतिरिति । सर्वे च वेदा ब्रह्मणि पर्यवसिता इति "सर्वे वेदा यत् पदमामनन्ति (७)" (७. क० उ० २.१५ ।) अनेन वाक्यैनैतदेव सिद्धम्, येन सर्वे देवाः स्वरूपं लभन्ते, सर्वे वेदा यस्य प्रतिपादनं कुर्वन्ति, तद् यदि मानवा न जानन्ति तदा ऋङ्मन्त्रेण तस्य को लाभः ? अर्थाद् ऋगादिशब्दजालं तस्य कृते व्यर्थमेव । ब्रह्मवेदसाधनं वेदो वेदवेद्यं च ब्रह्म । सर्ववेदवेद्यस्य ब्रह्मणो ज्ञानं विना वेदविहितयागादिकर्मणोऽनुष्ठानं वृथैव, एवमेव ऋङ्मन्त्रसमूहस्य तादृशस्य पुरुषस्य कृते व्यर्थमेव ।

"ये इत्", "ये एव" ये एतदक्षरपदवाच्यं ब्रह्म जानन्ति त एव "समासते" सम्यक् तिष्ठन्ति, अर्थात् स्वरूपे तिष्ठन्ति । एतादृशस्य पुरुषस्य संसारे पुनरावृत्तिर्न भवति । अथ वा "ये विदुरित्" ये ब्रह्मस्वरूपं जानन्ति, ब्रह्म ज्ञात्वा तत्रैव "समासते" समस्तसत्रस्य "सं=युगपत्" अनुष्ठानं कुर्वन्ति, अर्थाद् ब्रह्मवित् कर्मणोऽनुष्ठानं विनैव सकलकर्मानुष्ठानफलं प्राप्नुवन्ति । ब्रह्मज्ञानेनैव समस्तफलं प्राप्य कृतकृत्यः पूर्णतृप्तो भवति । कर्मफललाभार्थं ब्रह्मज्ञपुरुषस्य कृते कर्मणोऽनुष्ठानस्यावश्यकता न भवति ।

यास्केन च मन्त्रस्य त्रिविधा व्याख्या कृता । प्रथमा व्याख्या शाकपूणिसम्मता, द्वितीया व्याख्या शाकपूणिपुत्रस्य तृतीया व्याख्या चात्मवादिसम्मता । तत्र शाकपूणिमते मन्त्रप्रतिपाद्य ॐकारः, तत्पुत्रमते आदित्यमण्डलान्तर्वर्त्ती

હિરણ્મયઃ પુરુષઃ પરમેશ્વરઃ । તૃતીયમતે ચ આત્મતત્ત્વમેવ પ્રતિપાદ્યમ્ ।

શાકપૂણિમતે મન્ત્રાન્તર્ગતસ્યાક્ષરશબ્દસ્યાર્થઃ ઊઙ્કારઃ । ઊઙ્કારં વિના ઋઙ્મન્ત્રાર્થો વ્યર્થઃ, કસ્યાપિ કર્મણઃ સાધનં તેન ન ભવતિ । ઊઙ્કાર એવ પરમં વ્યોમ । ઊઙ્કારે વિવિધશબ્દસમૂહાઃ પર્યવસિતા ઇતિ પરમં વ્યોમ । ભૂતાકાશશ્રેષ્ઠત્વાદોઙ્કારઃ પરમં વ્યોમ । ઊઙ્કારસ્ય અકારોકારમકારાત્મકસ્ય વ્યક્તમાત્રાત્રયસ્યોપશાન્તત્વે સર્વશબ્દાનુસ્યૂતશબ્દસામાન્યં વિદ્યતે, તદેવ પરમં વ્યોમ, તદેવ ચ ક્ષરણવર્જિતત્વાદ્ અક્ષરમ્ । વિશેષાવસ્થાયાં ક્ષરત્વેઽપિ સર્વવિશેષાનુસ્યૂતશબ્દસામાન્યમક્ષરમ્ । ઋગાદિ સર્વે શબ્દા એવ શબ્દસામાન્યે વ્યવસ્થિતા । વિશેષમાત્રમેવાનુગતસામાન્યેઽવસ્થિતમ્ । સમસ્તમૃદ્વિશેષો વિશેષાનુગતમૃત્સામાન્યે વ્યવસ્થિતઃ, દીપ્ત્યાત્મકદેવપ્રકાશકઃ ઋગાદિમન્ત્રઃ । શબ્દવિશેષત્વાચ્ચ મન્ત્રસ્ય ક્ષરત્વમ્ । સમસ્તં ક્ષરમેવાક્ષરે વ્યવસ્થિતમ્ । અત એવ મન્ત્રપ્રકાશ્યા દેવા મન્ત્રેણ પરમે વ્યોમ્નિ અક્ષરે અધિનિષણ્ણાસ્તિષ્ઠન્તિ । અનેનૈવાભિપ્રાયેણ “યસ્મિન્ દેવા અધિ નિષેદુઃ” ઇત્યુક્તં । સર્વોઽપ્યર્થસ્તદર્થવાચકશબ્દસ્ય પરિણામો વિવર્તો વા ? તથા ચાર્થમાત્રં વાચકે શબ્દે વ્યવસ્થિતમ્ । અર્થેષ્વેવ શબ્દઃ સર્વત્રાનુસ્યૂતો વિદ્યતે । શબ્દવિશેષોઽપિ શબ્દસામાન્યે વ્યવસ્થિત ઇતિ શબ્દસામાન્યં પરમમક્ષરં વ્યોમ ઇતિ સર્વઃ શબ્દવિશેષ ઊઙ્કારાત્મકે શબ્દે વ્યવસ્થિતઃ । અકારાદિત્રયસ્યોપશાન્તાવોઙ્કારો શબ્દસામાન્યે પ્રતિષ્ઠિત ઇતિ । અત એવ નુ “ઊઙ્કાર” “એવેદં સર્વમ્” ઇતિ શ્રુતાવુક્તમ્ । વિભૂતિસહિતસ્ય અક્ષરાત્મકસ્ય વ્યોમ્નો જ્ઞાનાભાવે ઋગાદિમન્ત્રેણાભીષ્ટસિદ્ધિર્ન કદાપિ સમ્ભાવ્યતે । યતઃ સમસ્તોઽપ્યયં શબ્દવિશેષશ્ચૈતસ્યૈવાક્ષરસ્ય વિભૂતિઃ । અક્ષરવિભૂતિષુ દીપ્ત્યાત્મકસ્ય દેવસ્ય પ્રધાનત્વાત્ તસ્યૈવ મન્ત્રે નિર્દેશઃ ।

મીમાંસાદર્શને મન્ત્રાત્મકો દેવઃ પ્રધાનભૂતોઽર્થવર્ગઃ શબ્દવિશેષશ્ચેતિ ઊँકારે શબ્દસામાન્યે સ વ્યવસ્થિતઃ ।

અર્થસમૂહોઽર્થાનુગતવાચકશબ્દવિશેષે વાચકઃ શબ્દ ॐ કારે, ॐ કારશ્ચ શબ્દસામાન્યે વ્યવસ્થિત ઇતિ પરમવ્યોમાક્ષરઃ સર્વાધાર ઇતિ ।

સાઙ્ખ્યે અવ્યક્તસિદ્ધ્યર્થમેષ એવ હેતુઃ “ભેદાનાં પરિણામાત્ સમન્વયાત્” ઇત્યનેનોક્ત ઇતિ સમન્વયહેતુનૈવાત્ર પરમવ્યોમ્નોઽક્ષરસ્ય સિદ્ધિઃ મન્ત્રે પ્રદર્શિતા । એષ એવ બ્રહ્મવાદો વ્યાકરણસિદ્ધાન્તસ્યાધારભૂતઃ । તદ્યથા –
અનાદિનિધનં બ્રહ્મ  શબ્દતત્ત્વં યદક્ષરમ્ ।
વિવર્તતેઽર્થ ભાવેન પ્રક્રિયા જગતો યતઃ ॥ (વા૦ પ૦ ૧.૧ ।)
ઇતિ વાક્યપદીયોપક્રમે વ્યાકરણરાદ્ધાન્તપ્રદર્શને ઉક્તમ્ । એષૈવ ઋક્ શબ્દબ્રહ્મવાદાખ્યદાર્શનિકસિદ્ધાન્તમૂલભૂતા ।

દેવપ્રધાનાર્થરાશિઃ શબ્દરાશિશ્ચ પરમવ્યોમાક્ષરરૂપેણ યદિ ન જ્ઞાયેતે, તદા મન્ત્રભાગસ્ય વ્યર્થતાં કો નામ નિવારયિતુમીષ્ટે ? અર્થરાશેઃ શબ્દસમૂહસ્ય ચાક્ષરરૂપેણ દર્શનદશાયાં દ્રષ્ટૃણામપ્યર્થતાદાત્મ્યં જાયતે । અક્ષરતાદ્ભાવ્યપ્રાપ્તૌ દ્રષ્ટા પ્રણવવિગ્રહાત્મનિ અનુપ્રવિષ્ટઃ સમીકૃતો ભવતિ । સર્વાનુસ્યૂતશબ્દસામાન્યરૂપસ્ય દ્રષ્ટા અપિ શબ્દાનુસ્યૂતઃ સન્ સમીકૃતો ભવતિ । વિશેષલેશવર્જિતઃ સન્ નિર્વાણમાપ્નોતિ । નિર્વિશેષશબ્દસામાન્યમેવ નિર્વિશેષચિત્સ્વરૂપં સર્વપ્રકાશસ્વરૂપમ્ ।

ચિત્પ્રકાશ એવ શબ્દાન્તર્વર્તી સન્ ભાસત ઇતિ શબ્દોઽપ્યર્થપ્રકાશકો જાયતે । નાત્ર સન્દેહો યચ્છબ્દબ્રહ્મવાદી વૈયાકરણોઽપિ ચિત્સ્વરૂપવાદી એવ । શબ્દબ્રહ્મવાદસ્ય વ્યાકરણમતસ્ય શાકપૂણિરેવ પ્રવર્તકઃ । ઇદાનીમોઙ્કારસ્વરૂપપ્રદર્શનોપક્રમે શબ્દબ્રહ્મસિદ્ધાન્તસ્ય વિશ્લેષણાદ્ વિરમ્યતે વિસ્તરભયાત્ ।

શાકપૂણિપુત્રસ્ય વ્યાખ્યા –
શાકપૂણિપુત્રોઽનયા ઋચા સંવિદાત્મકસ્ય તેજસઃ પ્રકાશં સ્વીકૃત્ય દીપ્તિપ્રતીકભૂતસ્યાદિત્યસ્ય (અખણ્ડાદિતેઃ પુત્રસ્ય) યન્મણ્ડલમ્, તન્મધ્યવર્તિનો હિરણ્મયપુરુષસ્ય બોધકત્વમઙ્ગીકરોતિ; સ્તુત્યર્થકાદ્ ઋચ્ ધાતોર્નિષ્પન્ન એષ ઋક્ શબ્દઃ । અત એવ “યદેનમર્ચન્તિ” ઇત્યુક્તમ્ । આદિત્યમણ્ડલસ્ય સવિત્રાત્મકસ્ય સર્વ એવ તેજસઃ પ્રાપ્ત્યર્થમર્ચન્તીતિ આદિત્યમણ્ડલસ્યાત્ર ઋક્શબ્દપ્રતિપાદ્યત્વમ્ । આદિત્યમણ્ડલાભિન્ન આદિત્યમણ્ડલમધ્યવર્તી હિરણ્મય પરમેશ્વર એવાક્ષરઃ, સ એવ ચ પરમવ્યોમ । તસ્માદેવ સર્વમોતમ્ । ઉક્તં છાન્દોગ્યોપનિષદિ - “ય એષ અન્તરાદિત્યે હિરણ્મયઃ પુરુષો દૃશ્યતે (૧) ” (૧. છા૦ ઉ૦ ૧.૬.૬ ।) ઇતિ । અસ્યાં શ્રુતાવપિ આદિત્યમધ્યવર્તી પુરુષ એવ પરમેશ્વર ઉચ્યતે । “અન્તસ્તદ્ધર્માપદેશાત્ (૨) ” (૨. વે૦ સૂ૦ ૧.૧.૨૦ ।) સૂત્રે આદિત્યમણ્ડલમધ્યવર્તી પુરુષ એવ પરમેશ્વરત્વેન વ્યવસ્થિતઃ । મન્ત્રસ્થદેવશબ્દેનાદિત્યરશ્મિસમૂહ એવ વર્ણ્યતે । રશ્મિસમૂહસ્ય દ્યોતમાનત્વાદ્ દેવશબ્દાભિધેયત્વમ્ । એષ રશ્મિસમૂહો દ્યોતમાને અધિનિષણ્ણો વર્તતે । એતદક્ષરાપરિજ્ઞાનં વિના આદિત્યમણ્ડલાત્મચર્ચા કિં ભવિષ્યતિ ? તન્મધ્યવર્તિનઃ પુરુષસ્ય યથાર્થજ્ઞાનં વિના આદિત્યજ્ઞાનં ન ભવિતુમર્હતિ । તજ્જ્ઞાતૈવ સમાસતે=સમ્યગ્ભાવેન સ્થિતો ભવતિ, અર્થાત્ સ્વસ્વરૂપે સ્થિતિં લભતે । તેજોમયત્વાન્ન સ પુનરાવર્તતે ।

તૃતીયવ્યાખ્યા –
આત્મવાદિનાં “ઋક્” શબ્દસ્યાર્થો શરીરમ્ । શરીરસ્થાનીન્દ્રિયાણિ દેવશબ્દાભિધેયાનિ વિષયાણાં દ્યોતનાદ્ દેવત્વમુચ્યતે । દ્યુત્ ધાતોર્દેવશબ્દો જાયતે । શરીરસ્થિતેન્દ્રિયગ્રામાદ્ વિભિન્નવિષયજ્ઞાનાત્ તદ્ વિષયવિષયકવિશેષવિજ્ઞાનસમૂહેઽનુસ્યૂતો નિર્વિશેષપ્રકાશ એવાક્ષરપદાભિધેયઃ । અત એવ ચિન્માત્રસ્વરૂપાત્મનોઽજ્ઞાને શરીરેણ ન કિમપિ ભવિતુમર્હતિ ? જ઼ીવનસાફલ્યાય નિર્વિશેષચિન્માત્રાક્ષરજ્ઞાનમાવશ્યકમ્ । તજ્જ્ઞાનેન ચ દ્રષ્ટુઃ સ્વરૂપમાત્રેવસ્થિતિર્ભવતિ ।

અત ઓઙ્કાર એવ સર્વં સામાન્યં જ્યોતિષાં જ્યોતિરિતિ તદુપાસના કરણીયેતિ ।

મનુસ્મૃતાવપ્યુક્તમ્ - “એકાક્ષરં પરં બ્રહ્મ (૩)” (૩. મનુ૦ ૨.૮૩ ।) ટીકાયાઞ્ચ એકાક્ષરમોઙ્કારઃ પરં બ્રહ્મ, પરબ્રહ્માવાપ્તિહેતુત્વાત્ । અગ્રે ચ–અક્ષરં દુષ્કરં જ્ઞેયં બ્રહ્મ ચૈવ પ્રજાપતિઃ । અક્ષરં પ્રણવરૂપમક્ષયં બ્રહ્મપ્રાપ્તિહેતુત્વાત્ ।

જૈનદર્શનેઽપિ “અર્હત્” ઇત્યસ્ય સિદ્ધસ્ય અશરીરસ્ય વા પ્રથમાક્ષરમ્ “અ” ઇતિ આચાર્યસ્ય, પ્રથમાક્ષરમ્ “આ” ઇતિ ઉપાધ્યાયસ્ય, પ્રથમાક્ષરમ્ “ઉ” ઇતિ મુનેઃ પ્રથમાક્ષરં મ ઇતિ પઞ્ચભિરક્ષરૈઃ “ૐ” ત્રિલોકાકારઃ । તસ્માદોઙ્કારસ્ય સર્વૈરેવ દીપ્તિરૂપત્વમઙ્ગીકૃતમિતિ ।

લેખકઃ - ડૉ૦ મહાપ્રભુલાલ ગોસ્વામી,

આચાર્યોઽધ્યક્ષશ્ચ,
તુલનાત્મકધર્મદર્શનવિભાગસ્ય
સમ્પૂર્ણાનન્દસંસ્કૃતવિશ્વવિદ્યાલયે

Proofread by Meera Iyer

*Omkarasya Darshanikam Svarupam*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*